दयति तं अतिस्थूलं क्षुद्रश्वासपिपासाक्षुत्स्वप्न-स्वेदगात्रदौर्गन्ध्यक्रथनगात्रसादगद्गदत्वानि क्षिप्रमेवाविशन्ति" । इत्यादि सुश्रुते १५ अध्यायः ॥ तस्य निदानादि यथा,—

"यैरेव कारणैर्हिक्का बहुभिः संप्रवर्त्तते ।
तैरेव कारणैः श्वासो घोरो भवति देहिनाम् ॥
विहाय प्रकृतिं वायुः प्राणोऽथ कफसंयुतः ।
श्वासयत्यूर्द्ध्वगो भूत्वा तं श्वासं परिचक्षते ॥
क्षुद्रकस्तमकश्छिन्नो महानूर्द्ध्वश्च पञ्चधा ।
भिद्यते स महाव्याधिः श्वास एको विशेषतः ॥
प्राग्रूपं तस्य हृत्पीडा भक्तद्वेषोऽरतिः परा ।
आनाहः पार्श्वयोः शूलं वैरस्यं वदनस्य च ॥
किञ्चिदारभमाणस्य यस्य श्वासः प्रवर्त्तते ।
निषसस्येति शान्तिश्च स क्षुद्र इति संज्ञितः" ॥

इति च सुश्रुते उत्तरतन्त्रे ५१ अध्यायः ॥

("रूक्षायासोद्भवः कोष्ठे क्षुद्रवात उदीरयन् ।
क्षुद्रश्वासो न सोऽत्यर्थं दुःखेनाङ्गप्रबाधकः ॥
हिनस्ति न स गात्राणि न च दुःखो यथेतरे ।
न च भोजनपानानां निरुणद्ध्युचितां गतिम् ॥
नेन्द्रियाणां व्यथां नापि काञ्चिदुत्पादयेद्रुजम् ।
स साध्य उक्तो बलिनः सर्व्वे चाव्यक्तलक्षणाः" ॥

इति चरके चिकित्सास्थाने २१ अध्याये ।)

क्षुद्रश्वेता, स्त्री, (क्षुद्रा श्वेता ।) अर्क्कादिगणान्तर्गतवृक्षविशेषः । यथा,—"अर्कालर्कारकरञ्जद्वयनागदन्तीमयूरकभार्गीरास्नेन्द्रपुष्पीक्षुद्रश्वेतामहाश्वेतावृश्चिकाल्यलवणास्तापसवृक्षश्चेति ॥

अर्कादिको गणो ह्येष कफमेदोविषापहः ।
कृमिकुष्ठप्रशमनो विशेषाद्व्रणशोधनः" ॥

इति सुश्रुते ३८ अध्यायः ॥

क्षुद्रसहा, स्त्री, (सह + अच् टाप् च । क्षुद्रा सहा कर्म्मधारयः क्षुद्रस्य सहेत्येके ।) मुद्गपर्णी । (अस्याः पर्य्याया यथा,—

"मुद्गपर्णी क्षुद्रसहा काम्बुद्गा सिंहपर्णिका ।
वन्या मार्ज्जारगन्धेति सूर्पपर्ण्याविभे च ते" ॥

इति वैद्यकरत्नमालायाम् ॥ अस्या व्यवहारो यथा, वमनभेषजान्तर्गतकषायविशेषे । "सुमनाः सौमनसायिनी हरिद्रा दारुहरिद्रा वृश्चीरपुनर्नवा महासहा क्षुद्रसहा कषायैश्च" । इति चरके विमानस्थाने ८ अध्याये ।) इन्द्रवारुणी । इति राजनिर्घण्टः ॥

क्षुद्रसुवर्णं, क्ली, (क्षुद्रं सुवर्णम् । नित्यकर्म्मधारयः ।) रीतिः । इति राजनिर्घण्टः । (पित्तलम् ।)

क्षुद्रहा, [न्] पुं, (क्षुद्रान् नीचान् क्रूरस्वभावान् हन्तीति । हन् + क्विप् ।) महादेवः । इति शिवसहस्रनामस्तोत्रम् । इति कश्चित् । महाभारतीयानुशासनपर्व्वणि शिवसहस्रनामसु एतन्नाम नास्ति । लिङ्गपुराणोक्तविष्णुकृतशिवसहस्रनामस्तोत्रे क्षुल्लहा इति नाम वर्त्तते । यथा,—

"प्रशान्तबुद्धिरक्षुद्रः क्षुल्लहा नित्यसुन्दरः ।
धैर्य्याग्रधुर्य्यो धात्रीशः साकल्यः शर्व्वरीपतिः" ॥

इति वृहत्तन्त्रसारः ॥

क्षुद्रहिङ्गुलिका, स्त्री, (क्षुद्रा हिङ्गुलिका नित्यकर्म्मधारयः ।) कण्टकारी । इति शब्दचन्द्रिका ॥ (गुणादयोऽस्य कण्टकारीशब्दे बोद्धव्याः ।)

क्षुद्रहिङ्गुली, स्त्री, (क्षुद्रा हिङ्गुली । नित्यकर्म्मधारयः ।) कण्टकारी । इति शब्दचन्द्रिकायां क्षुद्रहिङ्गुलिकाशब्ददर्शनात् ॥

क्षुद्रा, स्त्री, (क्षुद + "स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदीति" । उणां । २ । १३ । इति रक् ततष्टाप् ।) व्यङ्गा । नटी । वेश्या । सरघा । कण्टकारिका । इत्यमरः । २ । ४ । ९४ ॥ (अस्याः पर्य्याया यथा,—

"अनाक्रान्ता स्पृक्की व्याघ्री भण्टाकी च निदिग्धिका ।
सिंही धामनिका क्षुद्रा बृहती कण्टकारिका" ॥

इति वैद्यकरत्नमालायाम् ॥

"कण्टकारी तु दुःस्पर्शा क्षुद्रा व्याघ्री निदिग्धिका ।
कण्ठालिका कण्टिकिनी धावनी बृहती तथा" ॥

उभे च बृहत्यौ । यत आह सुश्रुतः ।

"क्षुद्रा या क्षुद्रभण्टाख्या बृहतीति निगद्यते" ।

गुणाद्यास्याः कण्टकारीशब्दे ज्ञातव्याः ॥ इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ अस्या व्यवहारो यथा, पञ्चतिक्तकषाये ।

"क्षुद्रामृताभ्यां सहनागरेण
सपौष्करञ्चैव किराततिक्तम् ।
पिबेत्कषायन्विह पञ्च तिक्तं
ज्वरं निहन्त्यष्टविधं समग्रम्" ॥

इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ।) चाङ्गेरिका । हिंस्रा । मक्षिकामात्रम् । इति हेमचन्द्रः ॥ वादरता । इति शब्दरत्नावली ॥ गवेधुका । इति रत्नमाला ॥

क्षुद्राग्निमन्थः, पुं, (क्षुद्रः अग्निमन्थः ।) दशमूले प्रसिद्धवृक्षविशेषः । छोटा गणियारि इति हिन्दीभाषा । तत्पर्य्यायः । तपनः २ विजया ३ गणिकारिका ४ अरणिः ५ लघुमन्थः ६ तेजोवृक्षः ७ तनुत्वचा ८ । अस्य गुणाः ।

"अग्निमन्थद्वयस्यैव तुल्यं वीर्य्यरसादिषु ।
तत्प्रयोगानुसारेण योजयेत् सुमनीषया" ॥

इति राजनिर्घण्टः ॥

क्षुद्राञ्जनं, क्ली, (क्षुद्रं अञ्जनम् ।) चक्षूरोगस्यौषधविशेषः । यथा,—

"गोमूत्रपित्तमदिराशकृद्धात्रीरसे पचेत् ।
क्षुद्राञ्जनं रसे चान्यत् यकृतस्त्रैफलेऽपि वा ॥
सैन्धवोपहितं युञ्ज्याद्विहितं वेणुशर्करे ।
मेदो यकृद्घृतञ्चाजं पिप्पल्यः सैन्धवं मधु ।
रसमामलकाच्चापि पक्कं सम्यङ्निधापयेत् ॥
कोषे खदिरनिर्म्माणे तद्वत् क्षुद्राञ्जनं हितम्" ॥

इति सुश्रुते १८ अध्यायः ॥

क्षुद्राण्डमत्स्यसंघातः, पुं, (क्षुद्राणां अण्डमत्स्यानां अण्डात् अभिनवजातानां मत्स्यानामित्यर्थः संघातः समूहः ।) पोताधानम् । इत्यमरः । १ । १० । १९ ॥ पोना इति भाषा ॥

क्षुद्रादिकषायः, पुं, (क्षुद्रः आदिर्यस्य स कषायः ।) कण्टकार्य्यादिकषायः । यथा,—

"क्षुद्रामृतानागरपुष्कराह्वयैः
कृतः कषायः कफमारुतोत्तरे ।
सश्वासकासारुचिपार्श्वरुग्ज्वरे
ज्वरे त्रिदोषप्रभवेऽपि शस्यते" ॥

इति भैषज्यरत्नावली ॥

क्षुद्रान्त्रं, क्ली, (क्षुद्रं अन्त्रं उदरस्थनाडीभेदः ।) हृदयस्थितसूक्ष्मान्त्रम् । यथा,—समाननाम्नः पवनस्य सकलाङ्गचारित्वेऽपि नाभ्यादिस्थानविशेषा वाचो युक्तिप्रादुर्य्याभिप्रायेण प्राणायतनानि प्रपञ्चयितुमाह ।

"वपा वसावहननं नाभिः क्लोम यकृत् प्लिहा ।
क्षुद्रान्त्रं वृक्कौ वस्तिः पुरीषाधानमेव च ॥
आमाशयोऽथ हृदयं स्थूलान्त्रं गुद एव च ।
उदरञ्च गुदौ कोष्ठौ विस्तारोऽयमुदाहृतः" ॥

वपा प्रसिद्धा । वसा मांसस्नेहः । नाभिः प्रसिद्धा । अवहननं फुप्फुसः । प्लीहा आयुर्व्वेदप्रसिद्धः । ते च मांसपिण्डाकारे सव्यकुक्षिगते । यकृत् कालिका । क्लोम मांसपिण्डः । ते च दक्षिणकुक्षिगते । क्षुद्रान्त्रं हृत्स्थान्त्रम् । वृक्कौ हृदयसमीपस्थौ मांसपिण्डौ । वस्तिर्मूत्राशयः । पुरीषाधानं पुरीषाशयः । आमाशयोऽपक्वान्नस्थानम् । हृदयं हृत्पुण्डरीकम् । स्थूलान्त्रगुदोदराणि प्रसिद्धानि । वाह्याद्गुदवलयादन्तर्गुदवलये द्वे । तौ च गुदौ कोष्ठौ कोष्ठे नाभेरधः प्रदेशे भवौ । अयञ्च प्राणायतनस्य विस्तार उक्तः । पूर्व्वश्लोके तु सङ्क्षेपः । अतएव पूर्व्वश्लोकोक्तानां केषाञ्चिदिह पाठः । इति मिताक्षरायां प्रायश्चित्ताध्यायः ॥ ("पञ्चदशकोष्ठाङ्गानि तद्यथा,— "नाभिश्च हृदयञ्च क्लोम च यकृच्च प्लीहा च वृक्कौ च वस्तिश्च पुरीषाधारश्चामाशयश्चेति पक्वाशयश्चोत्तरगुदश्चाधरगुदश्च क्षुद्रान्त्रञ्च स्थूलान्त्रञ्च वपावहञ्चेति" । इति चरके शारीरस्थाने ७ अध्याये ।)

क्षुद्रापामार्गः, पुं, (क्षुद्रः अपामार्गः । कर्म्मधारयः ।) रक्तापामार्गः । इति राजनिर्घण्टः ॥ (रक्तापामार्गशब्देऽस्य विवरणं ज्ञेयम् ।)

क्षुद्रामलकं, क्ली, (क्षुद्रं आमलकम् । नित्यकर्म्मधारयः ।) आमलकम् । इति राजनिर्घण्टः ॥ काठ आमला इति भाषा ।

क्षुद्रामलकसंज्ञः, पुं, (क्षुद्रामलकस्य संज्ञा यस्य ।) कर्क्कटवृक्षः । इति राजनिर्घण्टः ॥

क्षुद्राम्रः, पुं, (क्षुद्रः आम्रः । नित्यकर्म्मधारयः ।) कोषाम्रः । इति राजनिर्घण्टः ॥ (यथास्य पर्य्यायाः ।

"कोशाम्र उक्तः क्षुद्राम्रः कृमिवृक्षः सुकोशकः" ।

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ गुणाद्यास्य कोशाम्रशब्दे ज्ञेयाः ।)

क्षुद्राम्लपनसः, पुं, (क्षुद्रः अम्लपनसः ।) लकुचः । इति त्रिकाण्डशेषः ॥ (लकुचशब्दे विवृतिरस्य ज्ञातव्या ।)

क्षुद्राम्ला, स्त्री, (क्षुद्रा अम्ला ।) अम्ललोणिका । यथा,—

"क्षुद्रपत्रा च चाङ्गेरी क्षुद्राम्ला चाम्ललोणिका" ॥

इति हारावली । शप्ताङ्कुली । इति राजनिर्घण्टः ॥